## आतो मनिन्क्वनिब्वनिपश्च । (७४/३४१८)

छन्दसि इति वर्तते, सुपि उपसर्गेऽपि इति च । आकारान्तेभ्यो धातुभ्यः [1]सुपि उपपदे छन्दसि विषये मनिन् क्वनिप् वनिप् इत्येते प्रत्यया भवन्ति । चकारात् [2]विच् भवति । '[3]सुदामा' (ऋ. ६. २०. ७) । अश्वत्थामा । क्वनिप् – सुधीवा । सुपीवा । वनिप् – 'भूरिदावा' (ऋ. ९. ८७. ४) । '[4]घृतपावा' (अथर्व. १३. १. २४) । विच् खल्वपि – 'कीलालपाः' (ऋ. १०. ९१. १४) । 'शुभंयाः' (ऋ. ४. ३. ६) । [5]रामस्योपदाः ॥

## अन्येभ्योऽपि दृश्यन्ते । (७५/२९८०)

छन्दसि इति निवृत्तम् । अन्येभ्योऽपि [6]धातुभ्योऽनाकारान्तेभ्यो मनिन् क्यनिप् वनिप् इत्येते प्रत्यया दृश्यन्ते, विच् च । [7]सुशर्मा । [8]क्वनिप् – 'प्रातरित्वा' (ऋ. १. १२५. १) । 'प्रातरित्वानौ[9]' (काठ. ३०. १) । वनिप् – 'विजावाग्ने' (ऋ. ३. १. २३) । 'अग्रेयावा' (मै. सं. ४. १४. ९) । [10]विच् खल्वपि – 'रेडसि' (वा. सं. ६. १८)[11] । अपिशब्दः [12]सर्वोपाधिव्यभिचारार्थः । निरुपपदादपि भवति । 'धीवा' (अथर्व. ३. ५. ६) । '[13]पीवा' (मै. सं. २. ५१) । दृशिग्रहणं [14]प्रयोगानुसरणार्थम् ॥

## क्विप् च । (७६/२९८३)

सर्वधातुभ्यः सोपपदेभ्यो निरुपपदेभ्यश्च छन्दसि [15]भाषायां च क्विप् प्रत्ययो भवति । [16]उखायाः स्रंसते उखास्रत् । [17]पर्णध्वत् । वाहात् भ्रश्यति, [18]वाहाभ्रट् । 'अन्येषामपि दृश्यते' (६. ३. १३७/३५३९) इति दीर्घः ॥

## स्थः क च । (७७/२९८७)

[19]सुपि उपसर्गेऽपि इति [20]च वर्तते । स्था इत्येतस्माद् धातोः [21]सुपि उपपदे कप्रत्ययो भवति, क्विप् च । किमर्थमिदमुच्यते[22], [23]यावता 'सुपि स्थः' (३. २. ४/२९१६) इति कः सिद्ध एव[24], 'अन्येभ्योऽपि [25]दृश्यते' (३. २. १७८/३१५८) इति क्विप् ? बाधकबाधनार्थं पुनर्वचनम् । 'शमि धातोः सञ्ज्ञायाम्' (३. २. १४/२९२८) [26]अचं बाधते – शंस्थः । शंस्थाः ॥

---

1. सुपि नास्ति फ. 2. विच्च ब. 3. सुदामा नास्ति ह. 4. घृतपावा नास्ति ह, घृतपाता ग. 5. शयस्योपदाः ब. क, रायस्योषदाः ड, नास्ति फ. 6. धातुभ्यः नास्ति फ. 7. सुकर्मा ग. ह. 8. क्वनिप् नास्ति फ. 9. प्रातरित्वानः इत्यधिकम् ब. क. ड. 10. विच्... प्रयोगानुसरणार्थम् नास्ति ग. 11. पर्णं न वेः इत्यधिकम् अ. ब. क. ड. 12. सर्वविधिव्यतिचारार्थः क. 13. पीडा क. ह, नास्ति ग. 14. प्रयोगानुसारार्थम् क. 15. विषये इत्यधिकम् फ. 16. उषायाः स्रंसते उषास्रत् क. 17. पर्णं विध्वंसते इत्यधिकम् फ, वर्णानि ध्वंसते वर्णध्वत् ग. 18. वाहभ्रट् अ. ह, वहात् भ्रश्यति वहाभ्रट् ब. क. 19. सुपि नास्ति ह. 20. च वर्तते नास्ति ड. 21. सुबन्ते फ. 22. इति इत्यधिकम् अ, किमर्थमिदं वचनम् ह, उच्यते नास्ति क. 23. यावता नास्ति अ. फ. 24. चकारात् क्विप् च प्रत्ययो भवति । उखायाः स्रंसते उखास्रत्, पर्णानि ध्वंसते पर्णध्वत् । वहात् भ्रश्यति वहाभ्रट् इत्यधिकम् ह. 25. दृश्यन्ते ह. 26. इति इत्यधिकम् अ.